M. T. B. COLLEGE, SURAT
Manuscripts Library

No Ref.
Ser. 1485

Title Shri Nam Sahasra

1485

InComplete

C

	Shri Nam Shastra	Title
		Author
		Editor
SK		Year, Vols.
		Publisher
1485	Pages 16 10	Remarks

॥श्रीशिवायनमः॥ ॥श्रूयतांऋषयः
श्रेष्ठाकथयामियथाश्रुतं॥ विष्णुनाप्रा
र्थितोयेनसंतुष्टःपरमेश्वरः॥ तदहंकथ
याम्यद्यपुण्येनामसहस्रकं॥ श्रीविष्ण
रुवाच॥ ॥ॐनमःशिवाय॥ ॥नमःशि
वोहरोरुद्रःपुष्करःपुष्कलोचनः॥ अ
र्थिगम्यःसदाचारःसर्वशंभुर्महेश्वरः।
चंद्रापीडश्चंद्रमौलीविश्वंविश्वामरेश्वरः।

वेदांतसारःसंदोहःकपालीनीललो
हितः॥ध्यानाधारोपरिछेद्योगोरिभ
र्त्तागणेश्वरः॥अष्टमूर्त्तिःविश्वमूर्त्तिस्त्रि
वर्गःस्वर्यसाधनः॥ज्ञानगम्योदृढप्रज्ञो
देवदेवस्त्रिलोचनः॥वामदेवोमहादे
वोपटुपरिवृढोदृढः॥विश्वरूपोविरू
पाक्षोवागीशःशुचिमन्तरः॥सर्वप्रमा
१ णसंवादीवृषांकोवृषवाहनः॥ईशःपि

नाकीषट्वंगोचित्रवेषश्चिरंतनः।तमो
हरोमहायोगीगोप्ताब्रह्मांगकृज्जटी।
कालकालःकृत्तिवासासुभगःप्रण
वात्मकः।उन्नध्रपुरुषोजुष्योदुर्वा
सापुरशासनः॥दिव्यायुधःस्कंदगु
रुःपरमेष्टीपरात्परः॥अनादिमध्य
निधनोगिरिशोगिरिबांधवः॥कुबेर
बंधुःश्रीकंठोलोकवर्णोत्तमोमृडः॥

समाधिवेद्यःकोदंडीनीलकंठःपरश्व
धी॥विशालाक्षोमृगव्याधःसुरेशःसू
र्यतापनः॥धर्मधामाक्षमाक्षेत्रंभगवा
न्भगनेत्रभित्॥उग्रःपशुपतिस्तार्क्ष्यः
प्रियभक्तःप्रियंवदः॥दातादयाकरो
दक्षःकपर्दीकामशासनः॥श्मशाननि
२ लयःसूक्ष्मःश्मशानस्थोमहेश्वरः॥लो
ककर्त्तामृगपतिःमहाकर्त्तामहौषधिः॥

उत्तरोगुप्तिगोप्ताज्ञानगम्यःपुरातनः॥
नीतिःसुनीतिःशुद्धात्मासोमःसोमरतः
सुखी॥सोमपोऽमृतपःसौम्योमहाज्यो
तिर्महाद्युतिः॥तेजोमयोऽमृतमयोऽन्नम
यःसुधापतिः॥अजातशत्रुरालोकःसं
भाव्योहव्यवाहनः॥लोककरोवेदकरः
सूत्रकारःसनातनः॥महर्षिःकपिला
चार्योविश्वदीप्तिर्विलोचनः॥पिनाक

पाणिर्न्नूदेवः स्वस्तिदः स्वस्तिकृत्सु
धीः ॥ धातृधामाधामकरः सर्वदः सर्व
गोचरः ॥ ब्रह्मसृग्विश्वसृग्सर्गः कर्णिका
रः प्रियः कविः ॥ शाखो विशाखो गोशापः
शिको निषगन्तुत्तमः ॥ गंगाप्लवोदकोन
व्यः पुष्कलः स्थपतिस्थिरः । विजितात्मा
विषयात्मा नूतवादनसारथिः । सगणो
३ गणकायस्थः सुकीर्त्तिः छिन्नसंशयः । का

मदेवः कामपालो भस्मोद्धूलितविग्र
हः । भस्मप्रियो भस्मशायी कामी कां
तकृतागमः । समावर्त्तो निवृत्तात्मा
धर्मपुंजः सदाशिवः । अकल्मषश्च
तुर्बाहुः दुरावासो दुरासदः । दुर्लभो
दुर्गमो दुर्ग्गः सर्वायुधविशारदः । अ
ध्यात्मयोगनिलयः सुतंतुस्तंतुवर्द्ध
नः ॥ शुभांगो लोकसारंगो जगदीशो

जनार्दनः। भस्मशुद्धिकरो मेरुरोज
स्वी शुद्धविग्रहः। असाध्यो साधुसा
ध्यश्च भृत्यमर्कटरूपधृक्॥ हिरण्यरे
ताः पौराणो रिपुजीवहरो बलः। महा
ह्रदो महागर्तो सिद्धवृंदारवंदितः। व्या
घ्रचर्मांबरो व्याली महाभूतो महानि
धिः॥ अमृतामृतवपुः श्रीमान्पांचज
४ न्यः प्रभंजनः। पंचविंशतितत्त्वस्थः पा

रिजातः परात्परः॥ सुलभः सुव्रतो शूरो
वाङ्मयैकनिधिर्निधिः॥ वर्णाश्रमगुरु
र्वर्णी शत्रुजिच्छत्रुतापनः॥ आश्रमः क्ष
पणः क्षामो ज्ञानवानचलेश्वरः॥ प्रमा
णभूतो दुर्ज्ञेयः सुपर्णो वायुवाहनः॥ ध
नुर्धरो धनुर्वेदो गुणराशिर्गुणाकरः॥
सत्यः सत्यपरो दीनः धर्मांगो धर्मसाध
नः॥ अनंतदृष्टिरानंदो दंडो दमयिता द

मः॥ अनिवार्योमहामायोविश्वकर्म
विशारदः॥ वीतरागोविनीतात्मातप
स्वीभूतभावनः॥ उन्मत्तवेषःप्रच्छन्नो
जितकामोचितप्रियः॥ कल्याणःप्र
कृतिःकल्पःसर्वलोकप्रजापतिः॥ त
रस्वीतारकोधीमान्प्रधानप्रभुरव्य
यः॥ लोकपालोंतर्हितात्माकल्यादिः
५ कमलेक्षणः॥ वेदशास्त्रार्थतत्वज्ञोनि

यमोनियमाश्रयः॥ चंद्रःसूर्यःशनिः
केतुर्वैरागोविद्रुमच्छविः॥ भक्तिवश्यः
परंब्रह्ममृगबाणार्पणोनघः॥ अद्रि
रद्र्यालयःकांतःपरमात्माजगद्गुरुः॥
सर्वकर्मालयस्तुष्टोमांगल्योमंगला
वृतः॥ महातपादीर्घतपाःस्थविष्ठःस्थ
विरोद्रुमः॥ अहःसंवत्सरोव्याप्तिःप्रमा
णंपरमंतपः॥ संवत्सरकरोमंत्रःप्रत्य

यःसर्वदर्शनः॥ अजःसर्वेश्वरोसिद्धो
महारेताःमहाबलः॥ योगोयोग्योम
हातेजाःसिद्धःसर्वादिरग्रिहः॥ वसुर्व
सुमनासत्यःसर्वपापहरोहरः॥ सुकी
र्त्तिःशोभनस्रग्वीसर्ववाङ्मनसगोचरः॥
अमृतःशाश्वतःशांतोबाणहस्तःप्रता
पवान्॥ कमंडलुधरोधन्वीवेदांगोवेद
६ विन्मुनिः॥ भ्राजिष्णुर्भोजनंभोक्तालोक

नाथोदुराधरः॥ अतींद्रियोमहामा
यःसर्वावासश्चतुष्पथः॥ कालयोगी
महानादोमहोत्साहोमहाबलः॥ महा
बुद्धिर्महावीर्योभूतचारीपुरंदरः॥ नि
शाचरःप्रेतचारीमहाशक्तिर्महाद्यु
तिः॥ अनिर्देश्यवपुःश्रीमान्सर्वाचार्य
मनोगतिः॥ बहुश्रुतोमहामायोनिय
तात्माध्रुवोध्रुवः॥ तेजस्तेजोद्युतिधरः

नरकः सर्वलासकः ॥ नृत्यप्रियो नृ
त्यनित्यः प्रकाशात्मा प्रकाशनः ॥ बुध
स्पष्टाक्षरो मंत्रसमानः सारसंप्लवः ॥
युगादिकृद्युगावर्त्तो गंभीरो वृषवाह
नः ॥ दृष्टो विशिष्टः शिष्टेष्टः शरभः शर
भोधनुः ॥ तीर्थरूपस्तीर्थनामा तीर्थदृ
श्यस्तु तीर्थदः ॥ अपांनिधिरधिष्टानं वि
७ जयो जयकालवित् ॥ प्रतिष्टितः प्रमा

णज्ञो हिरण्यकवचो हरिः ॥ विमोचनः
सुरगणो विद्येशो बिंदुसंश्रयः ॥ बाल
रूपो बलोन्माथी विकर्त्ता गहनो गुहः ॥
कारणं करणं कर्त्ता सर्वबंधुविमोचनः ॥
व्यवसायो व्यवस्थानं स्थानदो जगदादि
जः ॥ गुरुदो ललितो भेदो नवात्मात्मनि
संस्थितः ॥ वीरेश्वरो वीरभद्रो वीरासन
विधिर्विराट् । वीरचूडामणिर्वेत्ता तीव्रा

नंदोनदीधरः॥आज्ञाधरस्त्रिशूलीचशि
पिविष्टःशिवालयः॥वालिखिल्योमा
हाहारस्तिग्मांशुर्बधिरःखगः॥अभि
रामःसुशरणःसुब्रह्मण्यःसुधापतिः॥
मघवाकौशिकोगोमान्विरामःसर्वसा
धनः॥ललाटाक्षोविश्वदेहःसारःसंसार
चक्रभृत्॥अमोघदंडीमध्यस्थोहिरण्य
८ ब्रह्मवर्चसः॥परमार्थःपरमयःसंवरो

व्याघ्रकोनलः॥रुचिर्वरुचिर्वंद्योवा
चस्पतिरहर्पतिः॥रविर्विरोचनःस्कं
दःशास्तावैवस्वतोयमः॥युक्तिरुन्नत
कीर्त्तिस्सानुरागःपरंजयः॥कैलासा
धिपतिःकांतःसवितारविलोचनः॥
विश्वोत्तमोवीतभयोविश्वभर्त्तानिवारि
तः॥नित्योनियतकल्याणःपुण्यश्रवण
कीर्त्तनः।दूरश्रवाविश्वसहोध्येयोदुःस्व

न्नाज्ञानः॥उन्नारणोडुःकृतिहाविज्ञे
योडुःमहोन्नवः॥अनादिमूर्त्तुर्वोल
ह्मीकिरीटीत्रिदशाधिपः॥विश्वगोप्ता
विश्वकर्त्तासुवीरोरुचिरांगदा॥जननो
जंनजन्मादिःप्रीतिमानुनितिमानुधवः
।वसिष्टःकश्यपोन्नानुन्नीमोन्नामपरा
क्रमः॥प्रणवस्तपथाचारोमहाकोशो
ए महाधनः॥जन्माधिपोमहादेवसकला

गमपारगः॥तत्वंतत्वविदेकात्मावि
न्नुर्विष्णुविभूषणः॥ऋषिब्राह्मणएश्व
र्यजन्ममृत्युजरातिगः॥यज्ञवाहन पं
चब्रह्मसमुत्पत्तिःविश्वेशोविमलोदयः
आत्मयोनिरनाद्यंतवत्सलोन्नक्लोद
धृक॥गायित्रीवल्लभःप्रांशुःविश्वावा
सःपद्माकरः॥शिशुगिरिरतःसम्राट्सु
षेणःसुरशत्रुहाः।अमोघोरिष्टनेमिश्च

मुकुंदो विगतज्वरः ॥ स्वयंज्योतिस्तनु
ज्योतिरात्मज्योतिरचंचलः ॥ पिंगलः
कपिलास्मश्रुः शास्त्रनेत्रत्रयीतनुः ॥
ज्ञानस्कंदोमहानितिः विश्वोत्पत्तिरुप
प्लव ॥ भगो विवस्वानादित्योयोगपारो
दिवस्पतिः ॥ कल्याणगुणनामाचपाप
हापुण्यदर्शनः ॥ उदारकीर्त्तिरुद्योगीस
१० द्योगासदसन्मयः ॥ नक्षत्रमालीनाके